॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥
૫. પંચમઃ સર્ગઃ
વેદાંતવિદ્યાનિજરાજ્યપાલને સંકલ્પ્યમાનો ગુરુણા ગરીયસિ ।
અદભ્રચેતા અભિષિચ્યતે પુરા સ વારિભિર્વારિજપૂરિતૈરથ ॥ ૫.૧ ॥

આનંદરૂપસ્ય પરસ્ય પાત્ર ધીઃ આનંદસંદાયિસુશાસ્ત્રકૃત સ યત ।
આનંદતીર્થેતિ પદં ગુરૂદિતં બભૂવ તસ્યાત્યનુરૂપ રૂપકમ ॥ ૫.૨ ॥

કદાચિદત્રોપયયૌ યતિઃ સખા ગોવિંદબુદ્ધેર્બહુશિષ્યસંવૃતઃ
અમુષ્ય શિષ્યા અનુમાનશિક્ષિતાઃ તદાઽજિગીષન ગુરુબુદ્ધિમુદ્ધતાઃ ॥
૫.૩ ॥

ભિદા સુસાધ્યેત્યનુમાનમત્ર તૈઃ પ્રાયુજ્યતાઽશુ પ્રતિપક્ષભીષણમ
અખંડયદ વ્યકતમખંડ ધીરિદં સ પક્ષદક્ષઃ ફણિનં વિરાડિવ ॥ ૫.૪ ॥

અથાપિ મિથ્યા વિમતં મતત્વતો વિવાદ નિર્મુકત વદિત્યવાદિ તૈઃ ।
અનેન સત્યં વિમતં મતત્વતો યથા ઘટાદીત્યનુમા ન્યગદ્યત ॥ ૫.૫ ॥

હેતોરતિવ્યાપ્તિરવાદિ તૈર્યદા સકૌતુકૈસ્તૂર્ણમસાવવિસ્મયઃ ।
ન શુક્તિરૂપ્યાદિ મતં યદન્યથા મતં તદિત્યાદિ વદન જિગાય તાન ॥ ૫.૬
॥

www.yousigma.com

તત્ત્વેઽપ્યતત્ત્વે વિમતેઽનુમાં વદન તદપ્રતિષ્ઠાં પ્રતિપાદુકઃ સ્વયમ ।
વિજિત્ય વિશ્વાન વિદૂષં સભાસ્વસૌ જગામ નામ્નાઽપ્યનુ માન તીર્થતામ
॥ ૫.૭ ॥

સમસ્તવાદીંદ્રગજપ્રભંગદઃ ચરન્નવન્યાં પ્રતિપક્ષકાંક્ષયા ।
વેદદ્વિષાં યઃ પ્રથમઃ સમાયયૌ સ વાદિસિંહોઽત્ર સબુદ્ધિસાગરઃ ॥ ૫.૮ ॥

તસ્યોરુદુર્ગર્વવતો જિગીષયા નિશાતમાદત્ત મુકુંદધીર્દ્રુતમ ।
સ્વશિષ્યહસ્તેન મઠાંતરેષુધેઃ સુપક્ષદક્ષં સુખતીર્થમાર્ગણમ ॥ ૫.૯ ॥

જૈત્રં પ્રજિજ્ઞાસુ કુતૂહલાકુલં નૃણાં કુલં પ્રત્વરિતં નિશામયન ।
અવંદતોપેત્ય ગુરું ગરિષ્ઠધીઃ સ રૂપ્યપીઠાયતનોત્તમસ્થિતમ ॥ ૫.૧૦ ॥

સ વાદિસિંહસ્ય ગિરં ગરીયસીં અખંડયત પંડિતમંડલાંતરે ।
તીક્ષ્ણેન વાક્યેન મિતેન વેગિના ગદાં શરેણેવ વિશારદો મુહુઃ ॥ ૫.૧૧ ॥

અસાવસૂયન દ્વિનવપ્રકારતો વ્યચીકલ પત કંચિદથાર્થમુચ્ચકૈઃ ।
જગદ્વિજેતુશ્ચ જયે સસંશયઃ તાવજ્જનોઽજાયત પૂર્ણચેતસઃ ॥ ૫.૧૨ ॥

વિકલ્પકોટીરથ ખંડયન દ્રુતં રેજેઽધિકં સ્મેરમુખો બૃહન્મતિઃ ।
તમસ્તતીર્વા દ્યુમણિર્વિશુદ્ધયા ગવા શ્રિતો વિષ્ણુપદં સદાસ્પદમ ॥ ૫.૧૩ ॥

અગાધમાત્મન્યતિવેલમુદ્ધતં તિરસ્કૃતાશેષસરસ્વતીતતિમ ।
કામં મહામાનસકુંભસંભવો લઘૂચકારેત્યપિ બુદ્ધિસાગરમ ॥ ૫.૧૪ ॥

શ્વ એવ વાદોઽસ્ત્વિતિ વાદિનૌ ખલૌ અધોત્તરં ભાતિ યદીર્યતામિતિ ।
મધ્વે બ્રુવાણેઽમત તૌ જિતૌ જનઃ સ નિશ્ચિકાયાપિ નિશાપલાયનાત ॥
૫.૧૫ ॥

બુદ્ધ્યબ્ધિના વાદિવરેણ યાઽર્જિતાં જયશ્રિયં ભૂપરિવર્તિના ચિરાત ।
અહો મુહૂર્તાદયમપ્રયત્નવાન અવાપ્તવાનિત્યતિવિસ્મિતં જનૈઃ ॥ ૫.૧૬ ॥

વ્યાખ્યાન કદાચિન્મણિમદ્વિનિર્મિતં ભાષ્યં જનૈસ્તર્કવિશારદૈર્વૃતઃ ।
ઉવાચ વાચં પરિહાસહાસવાન સમ્મોદતીર્થઃ સુરમોદદાયિનીમ ॥ ૫.૧૭
॥

સત્સૂત્રભાવે પ્રવિચારિતે પૃથગ ભાષ્યાભિસંધૌ ચ વિશુદ્ધબુદ્ધિભિઃ ।
નિગૃહ્ય ગૂઢાગ્રહમુગ્રમેતયોઃ માન્યોઽન્વયોઽન્યોન્યમહો ન દૃશ્યતે ॥ ૫.૧૮
॥

ઈતિ બ્રુવાણે પ્રતિપાદયત્યલં ભાષ્યેઽત્ર દોષાન પ્રબલાન મુહુર્મુહુઃ ।
તસ્મિંસ્તુ વિસ્મેરધિયોઽપિ યત્નતો ન સ્થેયસઃ પર્યહરન્નિમાનમી ॥
૫.૧૯ ॥

નન્વસ્ય સૂત્રસ્ય પરોઽર્થ ઉચ્યતાં યદ ભાષ્યમાત્રં ભવતા નિરસ્યતે ।

ભવાદૃશૈર્યઃ કવિભિર્ન દૂષ્યતે કથંચનેત્યૂચુરિમે વચસ્વિનઃ ॥ ૫.૨૦ ॥

અક્લિષ્ટશબ્દાન્વયમેષ સંભવત સૂત્રાર્થમુચ્ચૈર્વચનં તદાઽઽદદે ।
માનીકૃતામ્નાયચુતસ્મૃતિ ક્ષણાદ એષ્યત્કથા તાંડવસૂત્રધારકમ ॥ ૫.૨૧ ॥

બુભુત્સચા મત્સરવર્જિતાન જનાન સમત્સરાન વા વિજિગીષચાઽઽગતાન
। શ્રુતપ્રવીણાનતિતાર્કિકાન મુહુઃ ભંગ્ચાઽનચા ભંગમુપાનિનાચ સઃ ॥
૫.૨૨ ॥
કદાચિદેનં પ્રતિગમ્ચ સૌમ્ચધીઃ સ મધ્ચગેહાર્ચવરઃ પ્રસેદિવાન ।
હેતોઃ કુતશ્ચિદ વિમનીકૃતોઽપ્ચહો ગુણાબ્ધિલુબ્ધઃ સુજનઃ પ્રસીદતિ ॥
૫.૨૩ ॥

તેજોઽમૃતં નંદનગાત્રપાત્રગં નેત્રાંજલિભ્ચામપિબત સદાઽવ્ચચમ ।
વિદ્યાસુધાં ચાસ્ચ વચોમહાઘટે પૂર્ણામસૌ કર્ણપુટેન પંડિતઃ ॥ ૫.૨૪ ॥

લીલાવિવાદે ગુરુણા જગદ્ગુરોઃ પ્રસંગતસ્તત્ર ચ તાદૃશે સતિ ।
સૂત્રાર્થવિચ્ચેત કુરુ ભાષ્યમંજસે ત્યાક્ષેપપૂર્વં ગુરુરભ્યધાદિમમ ॥ ૫.૨૫
॥

વિધાનમાત્રં તદુપાદદે તદા પચો ચથાઽચ્છં પરમઃ સ હંસરાટ ।
તલ્લીનમાક્ષેપમુપૈક્ષતાફલં વારીવ સંતો હિ ગુણાંશતોષિણઃ ॥ ૫.૨૬ ॥

વૈરાગ્યવૈચાત્યસુવાકત્વપૂર્વકૈઃ ચુતો ગુણૈઃ પારમહંસ્ચભૂષણૈઃ ।

જ્યેષ્ઠો યતિર્યો લિકુચાન્વયોદ્ભવઃ તં ભૂરિભક્તિઃ સ કદાચિદબ્રવીત ॥
૫.૨૭ ॥

વિરોધિ વેદાંતકૃતાંતસંપદાં ભાષ્યાદિકં ચેદિદમસ્તુ કા ક્ષતિઃ ।
અસ્મભ્યમાચક્ષ્વ વિચક્ષણોચિતં ભાવં તુ સૂત્રોપનિષદ્વિવક્ષિતમ ॥ ૫.૨૮
॥

ઈત્યસ્ય વાચા શરદેવ ભાસિતા યદાઽખિલાશાઃ શુભપૂર્ણયા બભૌ ।
પ્રમોદતીર્થાનનચંદ્રચંદ્રિકા વ્યાખ્યાભિધા વિષ્ણુપદપ્રકાશિની ॥ ૫.૨૯ ॥

જેષ્યન કદાચિત કિલ કાલપાલિતાં દિશં પ્રયાતોઽચ્યુતબુદ્ધિના સહ ।
સમગ્રધીર્મંડિતવિષ્ણુમંગલં વિષ્ણું જગન્મંગલમાનનામ સઃ ॥ ૫.૩૦ ॥

ભિક્ષાપ્રદાત્રાઽત્ર પરીક્ષિતું મુહુઃ દત્તે પ્રભુકતે કદળીફલોચ્ચયે ।
અનેન નિર્યત્નમવાર્યવિસ્મયઃ તમાર્યવર્યં વિજનેઽવદદ ગુરુઃ ॥ ૫.૩૧ ॥

ભિક્ષાવસાને દ્વિશતાધિકૈઃ ફલૈઃ વ્યૂઢૈઃ પ્રભુકતૈઃ પરિપૂરિતેઽપિ તે ।
તનૂદરે નાસ્તિ ગરિષ્ઠતા કથં સુચિત્ત સત્યં વદતાદ ભવાનિતિ ॥ ૫.૩૨ ॥

અંગુષ્ઠમાત્રં જઠરપ્રતિષ્ઠિતં જાજ્વલ્યમાનં મમ જાતવેદસમ ।
નિત્યં હિતં વિશ્વદહં ચ વિત્ત તં વિશ્વેશચેતા ઈતિ સોઽબ્રવીત તદા ॥
૫.૩૩ ॥

પર્યાકુલાનેકસરસ્વતીતતીન ન્યાયોપપન્નાન વિવિધાર્થસંયુતાન ।
અતીત્ય દેશાન સમયાંશ્ચ ચારુધીઃ અસૌ જગામાભિમતેન વર્ત્મના ॥
૫.૩૪ ॥

સ્વહેળયા પાતિતપાર્થિવવ્રજાં ધીશુદ્ધિદાં કેરળભૂષણાયિતામ ।
પયસ્વિનીં પ્રેક્ષ્ય પથિ દ્વિજાર્ચિતાં સ ભાવિનીમસ્મરદત્ર ચંડિકામ ॥
૫.૩૫ ॥

તતઃ ક્રમેણ પ્રચલન્નુપેયિવાન અવંદતેંદીવરસુંદરચ્છવિમ ।
અંભોજનાભં સ ભુજંગશાયિનં શ્રીવલ્લભં શ્રીમદનંતસત્પુરે ॥ ૫.૩૬ ॥

વેદાંતસૂત્રાણિ કૃતાંતવિત્તમો વ્યાખ્યાદસૌ શિષ્યગણાય સંસદિ ।
વિલક્ષણં જીવગણાદ ગુણાર્ણવં બ્રહ્માચ્યુતાખ્યં પ્રતિપાદયન મુહુઃ ॥
૫.૩૭ ॥

અપ્રાંશુનૂત્નોપપદાધિવાસજઃ સ સંકરો વૈરપરાયણઃ પુનઃ ।
અસૂયયોચેઽત્ર મહાનતિક્રમઃ સૂત્રાર્થ વાદોઽકૃતભાષ્યકેશ્ચિતિ ॥ ૫.૩૮ ॥

વદોત્તરં ભાતિ યદીહ કુર્મહે ભાષ્યં કૃતિર્નાસ્ય હિ દંડવારિતા ।
જગદ્ગુરૂણામિતિ તાં ગુરોર્ગિરં જનઃ સમસ્તોઽભિનનંદ સસ્મિતામ ॥ ૫.૩૯
॥

પ્રાજ્ઞૈર્મહાપૂરુષસર્વલક્ષણૈઃ સંપન્નદેહોઽયમિતીરિતે પ્રભૌ ।

પરે પરસ્યાપ્યતિપીનતાદૃશઃ સ્ફિક્ષાત્રસંશંસનમેવ ચક્રિરે ॥ ૫.૪૦ ॥

સ્ફિગ્દૂષણાનિ પ્રતિપાદયત્યલં સંપૂર્ણસંખ્યેઽસ્ય તુ લક્ષ્મશાસ્ત્રતઃ ।
તદ્દંડસંખંડનસંશ્રવં વ્યધાત તદક્ષમોઽસૌ પ્રકૃતિર્હિ સાઽસતામ ॥ ૫.૪૧ ॥
સ
નાત્વાઽત્ર તીર્થેષ્વચિરેણ કન્યકાતીર્થે સુતીર્થે સુખતીર્થ આપ્લુતઃ ।
સમુદ્રસેતૌ ચ નિમજ્ય વિષ્ણવે શ્રીરામનાથાય નમાશ્ચકાર સઃ ॥ ૫.૪૨ ॥

તમાવ્રજંતં યતિવેષધારિણં દંડં પ્રકાશ્યૈષ હસન્નભાષત ।
ખંડયેત દંડો યદિ ચંડ ન ત્વયા ત્વં પંડકોઽપંડિત વંધ્યવાગિતિ ॥ ૫.૪૩
॥

લજ્જાનતઃ સ્વાર્થમથાર્થયન્નસન ઉપૈક્ષ્યતાસૌ દ્વિજનાયકૈસ્તદા ।
આનંદયંતં વદનેંદુના જગત તં દ્વેષ્ટિ કઃ પ્રાજ્ઞમિહેતિ વાદિભિઃ ॥ ૫.૪૪ ॥

યાયાઃ પ્રસક્તાઃ પરિષત્સુ પૂરુષૈઃ વિદ્યા વિદગ્ધૈર્વિવિધૈઃ સમાગમે ।
સ તાસુતાસુ પ્રતિભાતિભાસુરો વિદ્યાસુ વિદ્યાધિપતિર્જિગાય તાન ॥
૫.૪૫ ॥

અચાલ્યમાનઃ સગુરુઃ સ ચાપલૈઃ અસજ્જનાનામબલીયસામિહ ।
ઉવાસ માસાંશ્ચતુરો મહામનાઃ સિંહો ગુહાંતોપગતઃ શુનામિવ ॥ ૫.૪૬ ॥

શૃંગારસિંધું સ ભુજંગશાયિનં શ્રીરંગવાસં કૃતમંગલં સતામ ।

અમંદધીર્દેવમવંદતાઽગતઃ કવેરકન્યાહિમવાયુસેવિતમ ॥ ૫.૪૭ ॥

તતો નિવૃત્તઃ પરમેવ પૂરુષં પ્રણમ્ય નાનાયતનેષુ સંચરન ।
પ્રકાશયન સ્વાતિશયાનમાનુષાન આશામુદીચીં પ્રયયાવસૌ ક્રમાત ॥
૫.૪૮ ॥

તતસ્તતો વિસ્મિતલોચનૈર્નરૈઃ નિરીક્ષ્યમાણોઽતિસુલક્ષણાકૃતિઃ ।
ગ્રામોત્તમાન પ્રાપ્ય પયસ્વિનીતટે વિવેશ દેવાયતનં સ કિંચન ॥ ૫.૪૯ ॥

અધીત્ય ધર્મેણ ષડંગમાગમં તદર્થસંવર્ણનનિર્ણયાન્વિતાઃ ।
પ્રાપુર્દ્વિજેંદ્રાસ્તમપૂર્વપૂરુષં જિજ્ઞાસવઃ સુપ્રથિતં જગત્ત્રયે ॥ ૫.૫૦ ॥

સુસ્મિતેન્દુમરવિન્દલોચનં સ્વર્ણવર્ણમતિભદ્રભાશણમ ।
વીતભૂશમપિ વિશ્વભૂશણંતં દિડ્રૂકશુરલમાપતજ્જનઃ ॥ ૫.૫૧ ॥

વિદ્યોરુદ્યુતિધીરતારકતિરસ્કારે પતંગાયિતો
દુર્વાદીભકુતર્કકુંભદલને સિંહપ્રબર્હાયિતઃ ।
લોલાલોકકલોકદૃક્કુમુદિની સંહ્લાદનેઽબ્જાયિતઃ
સંસન્મંડલમંડનાયિત ઉત સ્વાનંદતીર્થો બભૌ ॥ ૫.૫૨ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
નારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે પંચમઃ સર્ગઃ ॥